क्षेत्र और क्षेत्रज्ञ का यह संयोग कैसा अभिप्रेत है ? क्षेत्र से क्षेत्रज्ञ का संयोग, रज्जु से घट के अवयव के मेल के समान सम्बन्धविशेष नाम का संयोग तो सम्भव नहीं, क्योंकि वह आकाश जैसा अवयवरहित है। समवाय नाम का सम्बन्ध भी जैसा तन्तु और पट में है, सम्भव नहीं है। कारण यह है कि क्षेत्र और क्षेत्रज्ञ में परस्पर कार्य-कारण भाव संभव नहीं है। इसलिए कहते हैं क्षेत्र और क्षेत्रज्ञ विषय और विषयी भिन्न स्वभाव वाले हैं, अतः एक दूसरे के धर्मों का अध्यासरूप संयोग क्षेत्र और क्षेत्रज्ञ के स्वरूप का विवेक न होने से उसी प्रकार है जैसे रज्जु-शुक्तिका आदि का आरोपित सर्प-रजत आदि के संयोग। ऐसे अध्यासरूप क्षेत्र-क्षेत्रज्ञ का संयोग मिथ्याज्ञानरूप है। शास्त्र के अनुसार क्षेत्र और क्षेत्रज्ञ में भेद का परिज्ञान करके पूर्वोक्त क्षेत्र से मूंज से ईषिका (सींक) के समान बताए गए लक्षणवाले क्षेत्रज्ञ को अलग कर ब्रह्म को "जो न सत् न असत् शब्द से वाच्य है" तथा जो सब उपाधि विशेष से वर्जित एवं ज्ञेय है, ब्रह्मस्वरूप से जो देखता है और क्षेत्र को माया की हाथी, स्वप्न में देखी वस्तु, गन्धर्वों के नगर के समान असत् होते हुए भी सत् जैसा भासित होता है, ऐसा समझकर निश्चित ज्ञान वाला होता है उसका मिथ्याज्ञान दूर हो जाता है, क्योंकि उपर्युक्त सम्यग्दर्शन से इस (मिथ्याज्ञान) का विरोध है।

(अविद्या-अध्यास) से आत्मा का संसारित्व है

न चात्मनः संसारित्वम्, अविद्याऽध्यस्तत्त्वादात्मनि संसारस्य। न हि रज्जुशुक्तिकागगनादिषु सर्परजतमलादीनि मिथ्याज्ञानाध्यस्तानि तेषां भवन्तीति।

(छा० उ० भा० ८।१२।१)

आत्मा का संसारित्व नहीं है, आत्मा में संसारित्व अविद्या से आरोपित है। रस्सी में सर्प, शुक्तिका में रजत, गगन में मलिनता आदि मिथ्याज्ञान से आरोपित होते हैं, उनके नहीं होते।

ननु सर्वक्षेत्रेष्वेक एवेश्वरो नान्यस्तद्व्यतिरिक्तो भोक्ता विद्यते चेत्, तत ईश्वरस्य संसारित्वं प्राप्तम्, ईश्वरव्यतिरेकेण वा संसारिणोऽन्यस्याभावात् संसाराभावप्रसंगः। तच्चोभयमनिष्टं, बन्धमोक्षतद्धेतुशास्त्रानर्थक्यप्रसंगात्, प्रत्यक्षादिप्रमाणविरोधाच्च। प्रत्यक्षेण तावत् सुखदुःखतद्धेतुलक्षणः संसार उपलभ्यते, जगद्वैचित्र्योपलब्धेश्च धर्माधर्मनिमित्तः संसारोऽनुमीयते। सर्वमेतदनुपपन्नमात्मेश्वरैकत्वे।

न, ज्ञानाज्ञानयोरन्यत्वेनोपपत्तेः। 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता' (कठ० १।२।४) तथा च तयोर्विद्याविद्याविषययोः फलभेदोऽपि विरुद्धो निर्दिष्टः 'श्रेयश्च प्रेयश्च'(कठ० २, २)इति। विद्याविषयः श्रेयः प्रेयस्त्वविद्याकार्यमिति। तथा च व्यासः—'द्वाविमावथ पंथानौ' (महा० शां० २४१ ६) इत्यादि, 'इमौ द्वावेव पंथानौ' इत्यादि च। इह च द्वे निष्ठे उक्ते। अविद्या च सह कार्येण विद्यया च हातव्येति श्रुतिस्मृतिन्यायेभ्योऽवगम्यते।···तथा च देहादिष्वात्मबुद्धिरविद्वान् रागद्वेषादिप्रयुक्तो धर्माधर्मानुष्ठानकृज्जायते म्रियते चेत्यवगम्यते, देहादिव्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमान्मुच्यन्त इति न केनचित्प्रत्याख्यातुं शक्यं न्यायतः। तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः संसारित्वमेव भवति। यथा देहाद्यात्मत्वमात्मनः। सर्वजन्तूनां हि प्रसिद्धो देहादिष्वनात्मसु आत्मभावो निश्चितोऽविद्याकृतः, यथा स्थाणौ पुरुषनिश्चयः। न चैतावता पुरुषधर्मः स्थाणोर्भवति स्थाणुधर्मो वा पुरुषस्य। तथा न चैतन्यधर्मो देहस्य देहधर्मो वा चेतनस्य। एवं सुखदुःखमोहात्मकत्वादिरात्मनो न युक्तोऽविद्याकृतत्वाविशेषाज्जरामृत्युवत्।···कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाध्यारोपित इति न तेन ज्ञातुः किंचिद् दुष्यति। यथा बालैरध्यारोपितेनाकाशस्य तलमलिनवत्त्वादिना।

एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य संसारित्वगंधमात्रमपि नाशंक्यम्। नहि क्वचिदपि लोके अविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोऽपकारो वा दृष्टः। (गी० भा० १३।२)

शंका—यदि सब क्षेत्रों में एक ही ईश्वर है, अन्य उसके सिवा कोई भोक्ता नहीं है, तो ईश्वर संसारी हो जायगा, अथवा ईश्वर से अतिरिक्त संचारी अन्य न होने से संसार का अभाव हो जायगा। यह दोनों ही अनिष्ट हैं क्योंकि बंध तथा मोक्ष एवं उनका साधन शास्त्र अनर्थक हो जायेंगे तथा प्रत्यक्ष आदि प्रमाणों का विरोध भी होगा। प्रत्यक्ष से तो सुख-दुःख एवं उनका हेतु रूप संसार उपलब्ध होता है, जगत् में विचित्रता को उपलब्धि से धर्म एवं अधर्म के निमित्त हुए संसार का अनुमान किया जाता है। आत्मा और ईश्वर की एकता में तो यह सब अनुपपन्न है।

समाधान—नहीं, ज्ञान और अज्ञान के भेद से यह सब ठीक है। 'जो विद्या है और जो अविद्या है ये दोनों ही अत्यन्त विपरीत ह।' साथ ही उन विद्या तथा अविद्या के विषयों में फलभेद भी विरुद्ध है ऐसा निर्देश 'श्रेय और प्रेय भी' इसमें दिखलाया गया है। श्रेय विद्या का विषय है और प्रेय अविद्या का। व्यास ने भी ऐसा ही कहा है—'ये दोनों ही मार्ग हैं' इत्यादि तथा 'ये दो ही मार्ग हैं' इत्यादि और यहाँ गीता शास्त्र में भी दो निष्ठाएँ बतलायी गयो हैं। अविद्या अपने कार्यों सहित विद्या द्वारा विनाश्य है यह श्रुतिस्मृतिन्याय से जाना जाता है। उसी प्रकार देहादि में आत्मवृद्धि करने वाला अविद्वान् राग द्वेष आदि से प्रेरित होता है तथा धर्म अधर्म कार्यों को करता हुआ पैदा होता है तथा मरता रहता है, ऐसा जाना जाता है। देहादि से जो अतिरिक्त आत्मा को देखने वाले हैं वे रागद्वेष आदि का नाश कर धर्म अधर्म में अपनी प्रवृत्ति को शान्त कर मुक्त होते हैं। इसका किसी के द्वारा न्यायतः निराकरण नहीं किया जा सकता। तो ऐसी स्थिति में सत्य ईश्वर या क्षेत्रज्ञ ही अविद्याकृत उपाधि-भेद से संसारी जैसा हो जाता है, जैसे आत्मा के देह आदि में आत्मत्व। यह तो प्रसिद्ध ही है कि सब प्राणियों का देह आदि अनात्मा में आत्मभाव अविद्याकृत हैं, जैसे ठूठे में पुरुप का निश्चय होना। न तो इतने से ही पुरुष के धर्म ठूठे (स्थाणु) के होते हैं, न स्थाणु (ठूठे) के धर्म पुरुष के। उसी प्रकार चैतन्य का धर्म देह का और देह का धर्म चैतन्य का होना असंभव है। जरा मृत्यु के समान अविद्याकृत होने से सुखदुःखमोहात्मकता आदि आत्मा में युक्त नहीं है।···इस तरह कर्तृत्व भोक्तृत्व लक्षणवाला संसार ज्ञेय (क्षेत्र) में रहता है तथा अविद्या से ज्ञाता में आरोपित है, जिनसे ज्ञाता रंचमात्र भी दूषित नहीं होता। बालकों द्वारा जैसे आकाश की सतह में मलिनता आदि आरोपित हुआ करती है।

ऐसी परिस्थिति में सब क्षेत्रों में रहनेवाले भगवान्-क्षेत्रज्ञ या ईश्वर में संसारित्व के गन्धमात्र की भी आशंका नहीं करनी चाहिए। कहीं भी लोक में अविद्या से अध्यस्त धर्म से किसी का उपकार या अपकार होता नहीं देखा गया।

उपाधि का स्वरूप

सर्वेन्द्रियगुणाभासं सर्वाणि च तानीन्द्रियाणि श्रोत्रादीनि बुद्धीन्द्रियकर्मेन्द्रियाख्यानि, अन्तःकरणे च बुद्धिमनसी, ज्ञेयोपाधित्वस्य तुल्यत्वात्, सर्वेन्द्रियग्रहणेन गृह्यन्ते। अपि च अन्तःकरणोपाधिद्वारेणैव श्रोत्रादीनामप्युपाधित्वमित्यतः अन्तःकरणबहिष्करणोपाधिभूतैः सर्वेन्द्रियगुणैरध्यवसायसंकल्पश्रवणवचनादिभिरवभासत इति सर्वेन्द्रियगुणाभासं सर्वेन्द्रियव्यापारैर्व्यापृतमिव तज्ज्ञेयमित्यर्थः, "ध्यायतीव लेलायतीव" (बृ० ४, ३, ७) इति श्रुतेः।

(गी० भा० १३।१४)

ज्ञेय सभी इन्द्रियों के गुणों से प्रतीत होता है। ये समस्त इन्द्रियाँ हैं श्रोत्र आदि—बुद्धीन्द्रिय तथा कर्मेन्द्रिय, बुद्धि एवं मन भी अन्तरिन्द्रिय रूप में सभी इन्द्रियों में आते हैं। क्योंकि वे भी ज्ञेय की उपाधि वैसे ही हैं जैसे बाह्येन्द्रियाँ। वस्तुतः अन्तःकरणों के उपाधि होने से ही बाह्य इन्द्रियाँ श्रोत्र आदि भी ज्ञेय की उपाधियाँ बनती हैं। इस प्रकार उपाधिभूत जो अन्तःकरण और बहिष्करण हैं उन सभी इन्द्रियों के गुण अध्यवसाय (बुद्धि का), संकल्प (मन का), श्रवण (श्रोत्र का) वचन (वाक् का) इत्यादि से ज्ञेय अवभासित होता है। वह इन इन्द्रियों के व्यापारों से व्यापार वाला जैसा प्रतीत होता है— 'ध्यान करता हुआ सा, तेज चलता हुआ सा' ऐसा श्रुति कहती है।

सर्वप्राणिकरणोपाधिभिः क्षेत्रज्ञास्तित्वं विभाव्यते। क्षेत्रज्ञश्च क्षेत्रोपाधित उच्यते। क्षेत्रं च पाणिपादादिभिरनेकधा भिन्नम्। क्षेत्रोपाधिभेदकृतं विशेषजातं मिथ्यैव क्षेत्रज्ञस्य, इति तदपनयनेन ज्ञेयत्वमुक्तं 'न सत्तन्नासदुच्यते' इति। उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतःपाणिपादमित्यादि। तथाहि संप्रदायविदां वचनम् 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति। सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयो ज्ञेयशक्तिसद्भावनिमित्तस्वकार्या इति ज्ञेयसद्भावे लिंगानि ज्ञेयस्येत्युपचारत उच्यन्ते।

(गी० भा० १३।१३)

सभी प्राणियों की इन्द्रियों की उपाधियों से क्षेत्रज्ञ का अस्तित्व परिलक्षित होता है। क्षेत्र की उपाधिवश ही क्षेत्रज्ञ है। क्षेत्र बहुत प्रकार के हैं जैसे हाथ, पैर इत्यादि। क्षेत्रज्ञ में विशेषताएँ क्षेत्रों की उपाधि से की गई मिथ्या हैं तथा उनके हट जाने से क्षेत्रज्ञ की ज्ञेयता कही गई है कि न तो 'वह सत् शब्द से कहा जा सकता है और न असत् शब्द से'। वह सब ओर हाथ पांव वाला है इत्यादि ज्ञेयधर्म वाला होने की कल्पनाएँ—जो उपाधिकृत मिथ्यारूप होने पर भी—उसके अस्तित्व को प्रगट करने के लिए की जाती हैं। सम्प्रदायविदों का कहना है कि अध्यारोप और अपवाद से प्रपञ्चरहित को बताया जाता है। सर्वत्र सभी देहों के अवयव हाथ पैर आदि ज्ञेय शक्ति की सत्ता के कारण अपना कार्य करते हुए पाये जाते हैं। अतः वे ज्ञेय की सत्ता में लिंग (द्योतक) हैं ऐसा उपचार से कहा जाता है।

अध्यास और अपवाद का स्वरूप

तत्राध्यासो नाम—द्वयोर्वस्तुनोरनिवर्तितायामेव अन्यतरबुद्धौ अन्यतरबुद्धिरध्यस्यते। यस्मिन्नितरबुद्धिरध्यस्यतेऽनुवर्तत एव तस्मिंस्तद्बुद्धिः अध्यस्तेतरबुद्धावपि। यथा नाम्नि ब्रह्मबुद्धौ अध्यस्यमानायामप्यनुवर्तत एव नामबुद्धिः, न ब्रह्मबुद्ध्या निवर्तते। यथा वा प्रतिमादिषु विष्णवादिबुद्ध्यध्यासः।......

अपवादो नाम—यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिष्ठायां मिथ्याबुद्धौ निश्चितायां पश्चात् उपजायमाना यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेर्निवर्तिका भवति। यथा देहेन्द्रियसंघाते आत्मबुद्धिः आत्मन्येवात्मबुद्ध्या पश्चाद्भाविन्या "तत्वमसि" इत्यनया यथार्थबुद्ध्या निवर्त्यते। यथा वा दिग्भ्रान्तिबुद्धिर्दिग्याथात्म्यबुद्ध्या निवर्त्यते।

(ब्र० सू० भा० ३।३।९)

दो वस्तुओं में से विना निवृत्ति के एक की बुद्धि में अन्य की बुद्धि हो जाना अध्यास कहा जाता है जिसमें अन्य बुद्धि की प्रतीति होती है उसमें दूसरी बुद्धि का अध्यास होने पर भी अपनी बुद्धि अनुवर्तित होती है। जैसे नाम में ब्रह्मबुद्धि का अध्यास होने पर भी नामबुद्धि का अनुवर्तन होता ही है, वह ब्रह्मबुद्धि से निवृत्त नहीं हो जाती।...

अपवाद—जिस किसी वस्तु में पहले ही निविष्ट मिथ्या बुद्धि निश्चित हो तो बाद में पैदा होने वाली यथार्थबुद्धि पूर्व निविष्ट मिथ्याबुद्धि की निव-

तिका होती है। जैसे देह-इन्द्रिय संघात में आत्मबुद्धि आत्मा में ही आत्म-बुद्धि के बाद में होने वाली "तुम वही हो" इस यथार्थ बुद्धि द्वारा निवृत्त हो जाती है।

अविद्या, भावरूप मिथ्याप्रत्यय है

अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रः, रज्ज्वामिव सर्वप्रत्ययः।

(मु० उ० भा० १।२।११)

जैसे रज्जु में सर्प की प्रतीति होती है उसी प्रकार सब प्रकार की ब्रह्म से अन्य प्रतीति अविद्यामात्र है।

त्वं हि नः अस्माकं पिता ब्रह्मशरीरस्य विद्यया जनयितृत्वात्, नित्यस्याजरामरणस्य, अभयस्य। यस्त्वमेव अस्माकमविद्यायाः विपरीतज्ञानात् जन्ममरणरोगदुःखादिग्राहादपारात् अविद्यामहोदधेः विद्याप्लवेन परमपुनरावृत्तिलक्षणं मोक्षाख्यं महोदधेरिव पारं तारयस्यस्मान्।

(प्र० उ० भा० ६।८)

(शिष्यों ने गुरु से कहा—) तुम हमारे पिता हो क्योंकि नित्य, अजर, अमर, अभय ब्रह्म शरीर के विद्या द्वारा जनक हो। तुम ही हमारे विपरीत ज्ञान - अविद्या से जन्म, मरण, रोग, दुःखरूपी ग्राह से अपार अविद्या-महासागर की नौकारूप विद्या द्वारा, महासागर से पार करने के सदृश, अपुनरावृत्ति अर्थात् परम मोक्ष देकर हमें तारते हो।

अविद्या च स्वानुभवेन रूप्यते 'मूढोऽहम्,' अविविक्तं मम विज्ञानमिति।

(तै० उ० भा० २।८)

अविद्या भी स्वानुभव से ज्ञात होती है, 'मैं मूढ़ हूँ' 'मेरा ज्ञान अविवेकपूर्ण है,' इस रूप में।

सभी लौकिक एवं शास्त्रीय व्यवहार अविद्यात्मक हैं; संसार अनर्थ है

यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबन्धे सति, शब्दादिविज्ञाने प्रतिकूले जाते, ततो निवर्तन्ते अनुकूले च प्रवर्तन्ते; यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति; एवं

पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान्प्रति प्रवर्तन्ते, अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनां च प्रसिद्धोऽविवेकपुरःसरः प्रत्यक्षादिव्यवहारः। तत्सामान्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते। शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसम्बन्धमधिक्रियते, तथापि न वेदान्तवेद्यम्, अशनायाद्यतीतम्, अपेतब्रह्मक्षत्रादिभेदम्, असंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते; अनुपयोगादधिकारविरोधाच्च। प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते। तथाहि—'ब्राह्मणो यजेत' इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते।

(ब्र० सू० अ० भा० १।१।१)

जिस प्रकार पशु आदि क्षेत्र से शब्द आदि के सम्बन्ध होने पर शब्दादि का ज्ञान प्रतिकूल होन पर उससे निवृत्त होते हैं और अनुकूल होने पर प्रवृत्त होते हैं—उदाहरणार्थ, हाथ में दण्ड लिये हुए मनुष्य को संमुख देखकर 'यह मुझे मारना चाहता है' ऐसा समझकर पशु भागना शुरू कर देते हैं, हरे तृणों से पूर्ण हाथ वाले को देखकर उसके पास आ जाते हैं—उसी प्रकार पुरुष भी जो व्युत्पन्न (प्रबुद्ध) चित्त रखते हैं, क्रूर दृष्टि रखे, गालियां बकते, तलवार हाथ में लिये बलवान को देखकर उससे परे हो जाते हैं, इससे विपरीत के प्रति प्रवृत्त होते हैं; अतः पशु प्रभृति और पुरुषों का प्रमाण प्रमय व्यवहार समान होता है। पशुओं का प्रत्यक्षादि व्यवहार तो अविवेकपूर्ण होता है, यह प्रसिद्ध ही है। उनसे समानता देख बुद्धियुक्त पुरुषों का प्रत्यक्षादि व्यवहार भी उस समय समान है, यह निश्चित है। यद्यपि शास्त्रीय व्यवहार में तो बुद्धिपूर्वक करने वाला आत्मा के समझे बिना परलोक संबंध का अधिकारी नहीं होता, तथापि वेदान्त वेद्य, अशनायादि से परे, ब्राह्मण, क्षत्रिय आदि भेद से युक्त असंसारी आत्मत्व की अधिकार में अपेक्षा नहीं है, क्योंकि उपयोग नहीं है तथा अधिकार विरोध भी है। उस आत्मविज्ञान से पहले प्रवृत्त होने वाले शास्त्र अविद्यावाले विषय को पार नहीं करते। उदाहरण के लिये—'ब्राह्मण यज्ञ करे' इत्यादि शास्त्र आत्मा में वर्ण, आश्रम वय, अवस्था आदि विशेष अध्यास का समाश्रयण करके ही प्रवृत्त होते हैं।

प्रमाणों का अविद्यात्मकत्व

तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाण-प्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि ।

कथं पुनरविद्यावद् विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ? उच्यते,—देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः । नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः सम्भवति । न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः संभवति । न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते । नचैतस्मिन्सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति । तस्मादविद्यावद् विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च ।

(ब्र० सू० अ० भा० १।१।१)

उस अविद्या नाम की यह आत्मा तथा अनात्मा का परस्पर अध्यास सभी लौकिक और वैदिक प्रमाण प्रमेय व्यवहारों की प्रवृत्ति का आधार है, तथा विधिनिषेधमोक्षपरक सभी शास्त्र भी अध्यासपूर्वक हैं ।

प्रत्यक्ष आदि प्रमाण तथा शास्त्र अविद्यावान् के विषय हैं, यह कैसे ? (उत्तर) देह, इन्द्रियादि में 'मैं मेरा' ऐसा अभिमान से रहित न तो प्रमातृता बन सकती है और न ही प्रमाणप्रवृत्ति उपपन्न होगी । इन्द्रियों का उपयोग किये बिना प्रत्यक्षादि व्यवहार सम्भव नहीं होता । अधिष्ठान के बिना इन्द्रियों का व्यवहार भी सम्भव नहीं होता । आत्मभाव के अध्यस्त हुए बिना देह से कोई व्यापार नहीं करता है । इन सभी के न होते हुए असंग आत्मा का प्रमातृत्व भी उपपन्न नहीं होता । प्रमातृत्व के बिना प्रमाण-प्रवृत्ति नहीं होती । इसलिए प्रत्यक्ष प्रमाण आदि तथा शास्त्र अविद्यावद् के ही विषय हैं । (इससे यह सिद्ध हुआ कि आत्मा को प्रमाणों की जरूरत नहीं है, वह स्वयं प्रकाश साक्षिमात्र है) ।

अविद्या के विषय में शास्त्र की अर्थवत्ता

ननु एवं सति संसारसंसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति चेत्, न, सर्वैरभ्युपगतत्वात् । मुक्तात्मनां हि संसारसंसारित्वव्यवहाराभावः सर्वैरेवात्मवादिभिरिष्यते । न च तेषां शास्त्रानर्थक्यादिदोष-

प्राप्तिरभ्युपगता। तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं भवतु। अविद्याविषये चार्थवत्त्वम्। यथा द्वैतिनां सर्वेषां बन्धावस्थायामेव शास्त्राद्यर्थवत्त्वं न मुक्तावस्थायाम्, एवम्।

(गी० भा० १३।२)

क्या इस प्रकार संसार और संसारी के अभाव में शास्त्र के अनर्थक होने का दोष नहीं आएगा, नहीं, क्योंकि सभी को यह स्वीकार है।···मुक्तात्मा को निश्चय ही संसार और संसारी भाव के व्यवहार का अभाव सभी आत्मवादी को इष्ट है। जैसे शास्त्र की अनर्थकता आदि दोष की प्राप्ति उनको नहीं मानी गई, वैसे ही हमारे लिए भी क्षेत्रज्ञों की ईश्वर से एकता होने पर शास्त्र की अनर्थकता है, और अविद्या विषय में सार्थकता। सभी द्वैतियों को बन्धावस्था में ही शास्त्र आदि की सार्थकता मान्य है, न कि मुक्तावस्था में, उसी प्रकार हमें भी।

तस्मादहं ब्रह्मास्मीति एवदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि। न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति।

(ब्र० सू० भा० १।१।४)

इसलिए मैं ब्रह्म हूँ इस अपरोक्षानुभव से पूर्वकाल तक ही सारी विधियाँ और अन्य सभी प्रमाण समाप्त होते हैं। अहेय और अनुपादेय ब्रह्मज्ञान अर्थात् आत्मा अद्वैत है, ऐसा ज्ञान होने पर कोई भी प्रमाण सम्भव नहीं होता क्योंकि प्रमाणों का न तो विषय रह जाता है और न ही कोई प्रमाता।

वीजांकुरादिवदविद्याकृतः संसार आत्मनि क्रियाकारकफलाध्यारोपलक्षण अनादिरनन्तोऽनर्थः।

(बृ० उ० भा० १।१।१)

वीज–अंकुर इत्यादि के समान यह संसार—जो आत्मा में क्रिया, कारक, फल का अध्यास रूप है—अविद्याकृत है, अनादि, अनन्त एवं अनर्थ है।

अस्यानर्थहेतोः प्रहाणाय, आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते।

(ब्र० सू० अ० भा० १।१।१)

इस अध्यास को जो अनर्थ का हेतु है, नष्ट करने के लिए तथा (विरोधी) आत्मैकत्व ज्ञान की प्राप्ति के लिए सभी वेदान्तों का आरम्भ होता है।

मायाशक्ति, प्रकृति, अव्यक्त

सर्वज्ञस्येश्वरस्यात्मभूत इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ।

(ब्र० सू० भा० २।१।१४)

सर्वज्ञ, ईश्वर के मानों आत्मभूत अविद्या से कल्पित, सत् और असत् से विलक्षण अनिर्वचनीय एवं संसार प्रपञ्च के बीजभूत नाम और रूप सर्वज्ञ ईश्वर की माया शक्ति और प्रकृति रूप से श्रुति स्मृति में कहे जाते हैं ।

द्वे प्रकृतीश्वरस्य । त्रिगुणाऽष्टधाभिन्ना अपरा संसारहेतुत्वात् , परा चान्या जीवभूता क्षेत्रज्ञलक्षणेश्वरात्मिका, याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते ।···प्रकृतिश्च त्रिगुणात्मिका सर्वकार्यकरणविषयाकारेण परिणता पुरुषस्य भोगापवर्गार्थकर्तव्यतया देहेन्द्रियाद्याकारेण संहन्यते । सोऽयं संघात इदं शरीरम ।

(गी० भा० १३।१)

परो व्यतिरिक्तो भिन्नः । कुतस्तस्मात्पूर्वोक्तात् । तु शब्दोऽक्षरस्य विवक्षितस्याव्यक्ताद्वैलक्षण्यप्रदर्शनार्थः । भावोऽक्षराख्यं परं ब्रह्म । व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसंगोऽस्तीति तद्विनिवृत्त्यर्थमाह-अन्य इति । अन्यो विलक्षणः स चाव्यक्तोऽनिन्द्रियगोचरः । परस्तस्मादित्युक्तं, कस्मात्पुनः परः ? पूर्वोक्ताद् भूतग्रामबीजभूतादविद्यालक्षणादव्यक्तान् अन्यो विलक्षणो भाव इत्यभिप्रायः । सनातनश्चिरन्तनः यः स भावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति ।

(गी० भा० ८।२०)

ईश्वर की दो प्रकृतियाँ है । अपरा प्रकृति आठ प्रकार से विभक्त त्रिगुणरूप बनकर संसार का कारण है तथा दूसरी परा जीवभूत क्षेत्रज्ञलक्षण ईश्वररूप है। इन दोनों प्रकृतियों द्वारा ईश्वर जगत् की उत्पत्ति–स्थिति–प्रलय का हेतु बनता है । प्रकृति जो तीन गुणों वाली है सभी कार्य–इन्द्रिय–विषय के आकार से परिवर्तित होकर पुरुष के भोग और मोक्ष के प्रयोजन साधन के रूप में देह इन्द्रिय आदि आकार से संहत होती है । वही संघात यह शरीर है ।

(गी० भा० १३।१)

पर भिन्न है क्योंकि इसके पूर्व उसका कथन हुआ है। तु शब्द यहाँ आगे वर्णन किये जाने वाले अक्षर की उस पूर्वोक्त अव्यक्त से विलक्षणता दिखाने के लिए है। अक्षर नाम का भावपदार्थ पर ब्रह्म है। भिन्न होने पर भी समानता की निवृत्ति के लिए उसे अन्य बताया गया है और वह अव्यक्त इन्द्रियों से परे विलक्षण है। पर से कहा, तो किससे पर ? पूर्वोक्त भूतों के बीजरूप अविद्यालक्षण वाले अव्यक्त से अन्य विलक्षण भाव, यह अभिप्राय है। तथा सनातन भाव ब्रह्मा आदि सभी भूतों के विनष्ट होते हुए भी चिरन्तन है अर्थात् नित्य है।

मया सर्वतो दृशिमात्रस्वरूपेणाविक्रियात्मनाध्यक्षेण मम माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः सूयत उत्पादयति सचराचरं जगत्।...'यो अस्याध्यक्षः परमे व्योमन्' (ऋ० १०।१२७।७) इत्यादयश्च मन्त्रा एतमर्थं दर्शयन्ति। ततश्चैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगानभिसंबंधिनोऽन्यस्य चेतनान्तरस्याभावे भोक्तुरन्यस्याभावात्किंनिमित्तेयं सृष्टिरित्यत्र प्रश्नप्रतिप्रश्ने अनुपपन्ने। 'को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः (ऋ० १०। १२९।६) इत्यादिमन्त्रवर्णेभ्यः। दर्शितं च भगवता 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः, (गी० ५।१५) इति।

(गी० भा० ९।१०)

महतोऽपि परं सूक्ष्मतरं प्रत्यगात्मभूतं सर्वमहत्तरं च अव्यक्तं सर्वस्य जगतो बीजभूतमव्याकृतनामरूपं सतत्त्वं सर्वकार्यकारणशक्तिसमाहाररूपं अव्यक्तं अव्याकृताकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः। तस्मादव्यक्तात्परः सूक्ष्मतरः सर्वकारणकारणत्वात्प्रत्यगात्मत्वाच्च महांश्च, अतएव पुरुषः सर्वपूरणात्।... यस्मान्नास्ति पुरुषाच्चिन्मात्रघनात्परं किंचिदपि वस्त्वन्तरं, तस्मात्सूक्ष्मत्वमहत्त्वप्रत्यगात्मत्वानां सा काष्ठा निष्ठा पर्यवसानम्। अत्र हीन्द्रियेभ्य आरभ्य सूक्ष्मत्वादि परिसमाप्तम्। अत एव च गन्तॄणां सर्वगतिमतां संसारिणां सा परा प्रकृष्टा गतिः। 'यद्गत्वा न निवर्तन्ते' इति स्मृतेः।

(क० उ० भा० १।३।११)

संभवनं संभूतिः सा यस्य कार्यस्य सा संभूतिस्तस्या अन्या असंभूतिः प्रकृतिः कारणमविद्या अव्याकृताख्या तामसंभूतिमव्याकृताख्यां प्रकृतिं

कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवांधं तमोऽदर्शनात्मकं प्रविशन्ति।

(ईशा० उ० भा० १२)

मैं द्रष्टामात्र स्वरूप से सर्वथा निर्विकार रहते हुए भी अध्यक्ष हूँ। मेरी अध्यक्षता में अविद्यारूप मेरी त्रिगुणमयी माया-प्रकृति समस्त चराचर जगत् का उत्पादन करती है। 'जो इस जगत् का अध्यक्ष साक्षी चेतन है वह परम हृदयाकाश में स्थित है' इस प्रकार के मन्त्र इस अर्थ को प्रदर्शित करते हैं। सर्वाध्यक्ष रूप चैतन्य मात्र उस देव का सभी भागों से सम्बन्ध न होते हुए और अन्य चेतन भोक्ता के अभाव में किस निमित्त यह सृष्टि है? इस प्रश्न के आ पड़ने पर संभव न होने पर कौन वस्तुतः जानता है कि कौन बताए कि कहाँ से यह सृष्टि हुई इत्यादि मन्त्राक्षर भी यही बताते हैं। भगवान् की उक्ति भी है कि 'अज्ञान से यह आवृत है इससे प्राणी मोहित होते हैं'।

महत् से भी पर— सूक्ष्मतर प्रत्यागात्मस्वरूप और सबसे महान् अव्यक्त है, जो सम्पूर्ण जगत् का बीजभूत, अव्यक्त नामरूपों का सत्ता स्वरूप, सम्पूर्ण कार्यकारण शक्ति का संघात, अव्यक्त अव्याकृत और आकाशादि नामों से निर्दिष्ट होने वाला तथा वट की कणिका में वह वृक्ष की शक्ति के समान परमात्मा में ओतप्रोत भाव से आश्रित है। उस अव्यक्त की अपेक्षा सम्पूर्ण कारणों का कारण तथा प्रत्यगात्मरूप होने से पुरुष पर—सूक्ष्मतर एवं महान् है। इसीलिए वह सब में आपूर्ति के कारण पुरुष कहा जाता है क्योंकि चिद्घनमात्र पुरुष से भिन्न और कोई वस्तु नहीं है। इसलिए वही सूक्ष्मत्व, महत्व और प्रत्यगात्मत्व की पराकाष्ठा स्थिति या पर्यवसान है। इन्द्रियों से लेकर इस आत्मा में ही सूक्ष्मत्वादि की परिसमाप्ति होती है। अतः सम्पूर्ण गतियों वाले संसारियों की यही उत्कृष्ट गति है, जैसा कि 'जिसको प्राप्त होकर फिर नहीं लौटते' इस स्मृति से सिद्ध होता है।

उत्पन्न होना संभूति धर्मवाला कार्य संभूति हुआ तथा उससे अन्य असंभूति-प्रकृति-कारण अथवा अव्याकृत नाम की अविद्या है। उस असंभूति यानी अव्याकृत नामवाली प्रकृति या कारण की अज्ञानात्मिका अविद्या की जो कामना और कर्म की बीज है, उसकी जो उपासना करते हैं वे उसके अनुरूप ही अज्ञानरूप घोर अन्धकार में प्रवेश करते हैं।

यदि वयं स्वतन्त्रां कांचित्प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम, प्रसंजयेम तदा प्रधानकारणवादम्। परमेश्वराधीनात्वियमस्माभिः

प्रागवस्था जगतोऽभ्युपगम्यते न स्वतन्त्रा। सा चावश्याभ्युपगंतव्या। अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति। शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः। मुक्तानां च पुनरनुत्पत्तिः। कुतः? विद्यया तस्या बीजशक्तेर्दाहात्। अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः। तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम्; 'एतस्मिनु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति श्रुतेः। क्वचिदक्षरशब्दोदितम्; 'अक्षरात्परतः परः' इति श्रुतेः। क्वचिन्मायेति सूचितम्; 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति मन्त्रवर्णात्। अव्यक्ता हि सा माया; तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्।

(ब्र० सू० भा० १।४।३)

यदि हम जगत् के कारणरूप से किसी एक स्वतन्त्र प्रागवस्था को स्वीकार करें तो हम प्रधान कारणवाद के अनुयायी हो सकते हैं, परन्तु हम तो जगत् की इस प्रागवस्था (कारणवस्था) को परमेश्वर के अधीन स्वीकार करते हैं, स्वतन्त्र नहीं. उसे तो अवश्य स्वीकार करना चाहिये, क्योंकि वह प्रयोजन वाली है। उसके बिना निर्गुण निष्क्रिय परमेश्वर स्रष्टा सिद्ध नहीं हो सकता, कारण कि शक्ति रहित परमेश्वर में प्रवृत्ति उपपन्न नहीं हो सकती। मुक्त पुरुषों के बंध की पुनः उत्पत्ति नहीं होती, क्योंकि विद्या से उस बीज शक्ति का नाश (बाध) हो जाता है। अविद्यात्मक यह बीज शक्ति अव्यक्त शब्द से निर्दिष्ट है, परमेश्वर के आश्रित मायामयी एवं महा सुषुप्ति है, जिसमें स्वरूपज्ञान से रहित संसारी जीव सोते हैं। वह अव्यक्त कहीं पर "हे गार्गि इस अक्षर में ही आकाश ओत-प्रोत है" इस श्रुति में आकाश शब्द से निर्दिष्ट है और कहीं पर 'सर्वश्रेष्ठ अक्षर से भी उत्कृष्ट है' इस श्रुति में अक्षर शब्द से वर्णित है। कहीं पर 'प्रकृति को माया समझे और महेश्वर को मायावी' इस मन्त्र में मायाशब्द से सूचित है। यह माया अव्यक्त ही है, क्योंकि वह सद्रूप है अथवा असद्रूप है, ब्रह्म से अभिन्न है अथवा भिन्न इस प्रकार उसका निरूपण नहीं किया जा सकता।

ईश्वरज्ञानस्य विषयो भवति, तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे अव्याकृते व्याचिकीर्षित इति।

(ब्र० सू० भा० १।१।५)

ईश्वर के ज्ञान का विषय होता है अर्थात् तत्त्व और अतत्त्व से अनिर्वचनीय नामरूप जो अव्याकृत है उनको व्याकृत करना चाहता है, ऐसा तात्पर्य है।

पराञ्चि परागञ्चन्ति गच्छन्तीति, खानि तदुपलक्षितानि श्रोत्रादीनिन्द्रियाणि खानीत्युच्यन्ते। तानि पराञ्च्येव शब्दादिविषयप्रकाशनाय प्रवर्तन्ते। यस्मात् एवंस्वभावकानि तानि व्यतृणद्धिंसितवान्हननं कृतवानित्यर्थः। कोऽसौ। स्वयम्भूः परमेश्वरः स्वयमेव स्वतन्त्रोत भवति सर्वदा न परतन्त्र इति। तस्मात् पराङ् पराग्रूपाननात्मभूतान्शब्दादीन्पश्यत्युपलभते उपलब्धा नान्तरात्मन्नान्तरात्मानमित्यर्थः।

(क० उ० भा० २।४।१)

जो पराक् अर्थात् बाहर की ओर अञ्चन या गमन करती हैं उन्हें "पराञ्चि" (बाहर जाने वाली) कहते हैं। ख छिद्रों को कहते हैं; उनसे उपलक्षित श्रोत्रादि इन्द्रियां "खानि" नाम से कही गयी हैं। वे बहिर्मुख होकर ही शब्दादि विषयों को प्रकाशित करने के लिए प्रवृत्त हुआ करती हैं। क्योंकि वे स्वभाव से ही ऐसी हैं इसलिए उन्हें हिंसित कर दिया है अर्थात् उनका हनन कर दिया है। वह (हनन करने वाला) कौन है ? स्वयम्भू परमेश्वर, जो स्वतः ही सर्वदा स्वतन्त्र है, परतन्त्र नहीं है। इसलिये वह सर्वदा पराक् अर्थात् बहिः स्वरूप अनात्मभूत शब्दादि विषयों को ही देखता या उपलब्ध करता है, नान्तरात्मक अर्थात् अन्तरात्मा को नहीं।

अध्याय ४

ज्ञानमीमांसा

जैसा कि भूमिका में कहा गया है। ज्ञान शब्द का मुख्य अर्थ आत्म-चैतन्य है। आत्मा स्वप्रकाश है, किन्तु आत्मा ज्ञान का विषय नहीं है। ज्ञान का विषय न होते हुए भी आत्मा प्रत्यक्ष रूप है—अर्थात् प्रत्यक्ष व्यवहार योग्य है; चित्सुखाचार्य के अनुसार यही स्वप्रकाशता का लक्षण है। यह आत्मा बुद्धि की वृत्तियों को प्रकाशित करता है। इस प्रकार चैतन्य द्वारा अवभासित वृत्तियाँ लौकिक अर्थ में बोध या ज्ञान (वृत्तिज्ञान) कहलाती हैं। आत्मा की दो दृष्टियाँ हैं, इसका तात्पर्य यही है कि आत्मा नित्य, एकरस चैतन्यरूप भी है और बुद्धि वृत्तियों का अवभासक भी। अन्तःकरण की उपाधि से आत्मा ज्ञाता और प्रमाता बन जाता है।

शंकराचार्य, बौद्धों की भाँति, प्रमाण-विप्लव या प्रमाण-व्यवस्था को स्वीकार करते हैं, प्रत्येक प्रमाण का विषय अलग होता है। फलतः जो वस्तु प्रत्यक्ष या अनुमान से जानी जा सकती है, वह श्रुति का विषय नहीं है। परि-निष्ठित या सिद्ध वस्तु प्रमाणों से जानी जाती है। ब्रह्म ऐसी वस्तु या तत्त्व है; वह श्रुति प्रमाण से भी जाना जाता है और अनुभव आदि से भी; किन्तु ब्रह्म का जगत्कारणत्व केवल श्रुति से ही जाना जाता है।

शंकर प्रत्यक्ष को विशेष महत्त्व देते हैं। अनुमान प्रत्यक्ष पर ही आधारित होता है। वे अनुभव-विरोधी तर्क को कम महत्त्व देते हैं; किन्तु अनुमान-मूलक तर्क को महत्त्व पूर्ण मानते हैं। अनुमान कभी प्रत्यक्ष का विरोध नहीं कर सकता; श्रुति भी प्रत्यक्ष और अनुमान का विरोध नहीं कर सकती। एक प्रकार से सारे प्रमाण अविद्यामूलक ह; फिर भी वे अविद्यानिवृत्ति में सहायक होते ह। अविद्यानिवृत्ति ही आत्मज्ञान है, वही मोक्ष है।

ज्ञान का स्वरूप

ननु ज्ञानं नाम मानसी क्रिया। न। वैलक्षण्यात्। क्रिया हि नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च। यथा 'यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्'

इति, 'संध्यां मनसा ध्यायेत' इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसं; तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं, पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुतन्त्रमेव तत्। न चोदनातन्त्रं नापि पुरुषतन्त्रम्। तस्मान्मानसत्वेऽपि ज्ञानस्यमहद्वैलक्षण्यम्। यथा च 'पुरुषो वाव गौतमाग्निः', 'योषा वाव गौतमाग्निः' इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलचोदनाजन्यत्वात्तु क्रियैव सा पुरुषतंत्रा च। या तु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातंत्रा नापि पुरुषतंत्रा। किं तर्हि ? प्रत्यक्षविषयवस्तुतंत्रैवेति ज्ञानमेवैतन्न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्।

(ब्र० सू० भा० १।१।४)

पूर्वपक्ष—परन्तु ज्ञान तो मानसी क्रिया का नाम है।

उत्तर—ऐसा नहीं, क्योंकि ज्ञान उससे विलक्षण है। वस्तुस्वरूप की अपेक्षा के बिना जहाँ जिसका विधान किया जाता है वह क्रिया है, और वह पुरुष-संकल्प के अधीन है, जैसे 'जिस देवता के लिए अध्वर्यु ने हवि का ग्रहण किया हो उस समय होता "वषट्" शब्द का उच्चारण करता हुआ उसका मन से ध्यान करे' और 'संध्या का मन से ध्यान करे' इत्यादि श्रुतियों में ध्यान या चिन्तन यद्यपि मानसी क्रिया है, तो भी पुरुष के अधीन होने के कारण वह पुरुष द्वारा करने न करने अथवा अन्य प्रकार से करने के योग्य है। किन्तु ज्ञान प्रमाण अन्य है और प्रमाण यथार्थ वस्तुविषयक होता है, इसलिए ज्ञान करने न करने अथवा अन्य प्रकार से करने के योग्य नहीं हो सकता, वह केवल वस्तु के अधीन है, विधि के अधीन नहीं है, और पुरुष के अधीन भी नहीं है। अतः मानसिक होने पर भी ज्ञान का ध्यान से महान् अन्तर है। जैसे 'हे गौतम पुरुष अग्नि है', 'हे गौतम स्त्री अग्नि है' यहाँ स्त्री और पुरुष में अग्निबुद्धि मानसिक है और वह केवल विधिजन्य होने के कारण क्रिया ही है और पुरुष के अधीन है। लोक-प्रसिद्ध अग्नि में जो अग्निबुद्धि है, वह न विधि के अधीन है और न पुरुष के ही अधीन है, किन्तु प्रत्यक्ष विषय वस्तु (अग्नि) के अधीन है, अतः वह ज्ञान ही है, क्रिया नहीं। इसी प्रकार समस्त प्रमाण-विषयक वस्तुओं में समझना चाहिये।

ज्ञान स्वप्रकाश है

येषामपि निराकारं ज्ञानमप्रत्यक्षं, तेषामपि ज्ञानवशेनैव ज्ञेयावगति-

रिति ज्ञानमत्यन्तं प्रसिद्धं सुखादिवदेव इत्यभ्युपगन्तव्यम्। जिज्ञासाऽनुपपत्तेश्च, अप्रसिद्धं चेद् ज्ञानं ज्ञेयवद् जिज्ञास्येत।

(गी० भा० १८।५०)

जिसके मत में ज्ञान निराकार और अप्रत्यक्ष है उनको भी ज्ञेय का बोध (अनुभव) ज्ञान के अधीन होने के कारण, सुखादि की तरह ही ज्ञान अत्यन्त प्रसिद्ध है, यह मान लेना चाहिये तथा ज्ञान को जानने के लिए जिज्ञासा नहीं होती इसलिए भी (यह मान लेना चाहिए कि ज्ञान प्रत्यक्ष है) यदि ज्ञान अप्रत्यक्ष होता, तो अन्य वस्तुओं की तरह उसको भी जानने की इच्छा की जाती।

अनवस्थादोषश्च ज्ञानस्य ज्ञेयत्वाभ्युपगमात्...स्वात्मना चाविज्ञेयत्वेन अनवस्था अनिवार्या।

(प्रश्न० उ० भा० ६।२)

यदा हि सर्वं ज्ञेयं कस्यचित्तदा तद्व्यतिरिक्तं ज्ञानं ज्ञानमेवेति द्वितीयो विभाग एवाभ्युपगम्यतेऽवैनाशिकैः, न तृतीयस्तद्विषय इत्यनवस्थानुपपत्तिः।

(प्रश्न० उ० भा० ६।२)

अनवस्थादोष भी ज्ञान का ज्ञेयत्व मानने से होगा।...अपना ही ज्ञेय न हो सकने के कारण उसकी अनवस्था भी अनिवार्य ही है।

जब कि सब वस्तुएँ किसी एक की ही ज्ञेय हैं तो उनसे भिन्न (उनका प्रकाशक) ज्ञान तो ज्ञान ही रहता है। यह वैनाशिकों से इतर मतावलम्बियों ने दूसरा विभाग माना है। इस विषय में कोई तीसरा विभाग नहीं माना गया है। अतः उनके मत में अनवस्था नहीं आ सकती।

अपिच नासात्त्विका सत्त्ववृत्तिर्जानातिनाभिधीयते। न चाचेतनस्य प्रधानस्य साक्षित्वमस्ति। तस्मादनुपपन्नं प्रधानस्य सर्वज्ञत्वम्। योगिनां तु चेतनत्वात्सत्त्वोत्कर्षनिमित्तं सर्वज्ञत्वमुपपन्नमित्यनुदाहरणम्। अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्यापि कल्प्येत, यथाग्निनिमित्तमयःपिण्डादेर्दग्धृत्वम्। तथा सति यन्निमित्तमीक्षितृत्वं प्रधानस्य तदेव सर्वज्ञं मुख्यं ब्रह्म जगतः कारणमिति युक्तम्। यत्पुनरुक्तम् ब्रह्मणोऽपि न मुख्यं सर्वज्ञत्वमुपपद्यते, नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति स्वातंत्र्यासंभवादिति। अत्रोच्यते—इदं तावद् भवान् प्रष्टव्यः, कथं नित्यज्ञानक्रियत्वे सर्वज्ञत्वहानिरिति? यस्य हि सर्वविषयावभासनक्षमं ज्ञानं

नित्यमस्ति सोऽसर्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य कदाचिज्जानाति कदाचिन्न जानातीत्यसर्वज्ञत्वमपि स्यात्।

(ब्र० सू० भा० १।१।५)

साक्षी से रहित सत्वगुण की वृत्ति 'ज्ञा' धातु से विधान नहीं की जा सकती। अचेतन प्रधान साक्षी नहीं है, इस कारण प्रधान में सर्वज्ञत्व अनुपपन्न है। योगी तो चेतन होते हैं, अतः उनमें सत्वगुण के उत्कर्षक कारण सर्वज्ञत्व युक्त है। इसलिए इस स्थल में यह उदाहरण ठीक नहीं है। जैसे अयःपिण्डादि में दग्धत्व अग्निनिमित्तक है, वैसे ही प्रधान में ईक्षितृत्व साक्षी निमित्तक है, ऐसी यदि कल्पना हो तो प्रधान में ईक्षितृत्व का जो निमित्त है वही सर्वज्ञ मुख्य जगत् का कारण है, यह युक्त है; और यह जो कहा गया है कि ब्रह्म में भी मुख्य सर्वज्ञत्व उपपन्न नहीं है, क्योंकि ब्रह्म नित्य ज्ञान क्रिया वाला होने के कारण ज्ञान क्रिया के प्रति उसकी स्वतन्त्रता असम्भव है। इस विषय में कहते हैं—परन्तु, पहले तो आप यह बताइए कि नित्य ज्ञान-क्रिया के होने पर सर्वज्ञता की हानि किस प्रकार होगी? सब पदार्थों के प्रकाश करने की सामर्थ्य रखने वाला जिसका ज्ञान नित्य है और वह स्वयं असर्वज्ञ है, यह कथन विरुद्ध है। यदि ज्ञान को ही अनित्य माने तो कभी जानता है और कभी नहीं जानता है, इस प्रकार ब्रह्म असर्वज्ञ भी हो सकता है।

ज्ञान वस्तुतन्त्र है और देशकालनिरपेक्ष है

ज्ञानं तु वस्तुतन्त्रत्वान्न देशकालनिमित्ताद्यपेक्षते, यथा अग्निरुष्ण आकाशोऽमूर्त इति, तथा आत्मविज्ञानमपि।

(बृ० उ० भा० ४।५।१५)

यद्धि वेद्यं वस्तु विषयीभवति तत्सुष्ठु वेदितुं शक्यं, दाह्यमिव दग्धुमग्नेर्दग्धुर्न त्वग्नेः स्वरूपमेव। सर्वस्य हि वेदितुः स्वात्मा ब्रह्मेति सर्ववेदान्तानां सुनिश्चितोऽर्थः।

(के० उ० भा० २।१)

कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं वा कर्म,... न तु वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते।

(ब्र० सू० भा० १।१।२)

ज्ञान वस्तुतन्त्र होने के कारण देश, काल, निमित्त आदि की अपेक्षा नहीं

रखता। जिस प्रकार अग्नि उष्ण है और आकाश अमूर्त है—इन ज्ञानों को देशादि की अपेक्षा नहीं है, उसी प्रकार आत्मज्ञान को भी नहीं है।

जो वेद्य वस्तु वेत्ता की विषय होती है वही अच्छी तरह जानी जा सकती है, जैसे दहन करनेवाले अग्नि के दाह का विषय दाह्य पदार्थ ही हो सकता है, उसका स्वरूप नहीं हो सकता। ब्रह्म सभी ज्ञाताओं का आत्मा ही है, यह समस्त वेदान्तों का भलीभांति निश्चय किया हुआ अर्थ है। (अतः ब्रह्म ज्ञेय नहीं है।)

लौकिक अथवा वैदिक कर्म किया भी जा सकता है, नहीं भी और अन्यथा भी किया जा सकता है। (परन्तु)...वस्तु ऐसी है या ऐसी नहीं है, इस प्रकार का विकल्प संभव नहीं है।

चैतन्य (ज्ञान) आत्मा का स्वरूप है, गुण नहीं

एवं च सति दृष्टिरेव स्वरूपमस्य, अग्न्यौष्ण्यवत्, न काणादानामिव दृष्टिव्यतिरिक्तोऽन्यश्चेतनो द्रष्टा।

(बृ० उ० भा० १।४।१०)

इस प्रकार जैसे उष्णता अग्नि का स्वरूप है वैसे ही दृष्टि आत्मा का स्वरूप है। कणादमतावलम्बियों की मान्यता के समान दृष्टि से भिन्न कोई अन्य चेतन द्रष्टा नहीं है।

चैतन्य के सम्बन्ध में मतभेद

केचित् अग्निसंयोगात् घृतमिव घटाद्याकारेण चैतन्यमेव प्रतिक्षणं जायते नश्यतीति, तन्निरोधे शून्यमिव सर्वमित्यपरे, घटादिविषयं चैतन्यं चेतयितुर्नित्यस्यात्मनोऽनित्यं जायते विनश्यतीत्यपरे, चैतन्यं भूतधर्म इति लोकायतिकाः।

(प्रश्न० उ० भा० ६।२)

कुछ भ्रांत लोगों का मत है कि "अग्नि के संयोग से घृत के समान चैतन्य ही प्रत्येक क्षण में घट आदि आकारों में उत्पन्न और नष्ट हो रहा है। दूसरों का मत है कि इनका निरोध होने पर सब कुछ शून्य होता है तथा अन्य (नैयायिक) कहते हैं कि चेतयिता नित्य आत्मा की घटादि को विषय करने वाली अनित्य चेतना उत्पन्न और नष्ट होती रहती है। लोकायतिकों का कथन है कि चेतना (पृथिवी आदि) भूतों का धर्म है।

यदनुभवनं भूतभौतिकानां तच्चैतन्यमिति चेत्, तर्हि विषयत्वात्तेषां न तद्धर्मत्वम् अश्नुवीत; स्वात्मनि क्रियाविरोधात्। नह्यग्निरनुष्णः सन् स्वात्मानम् दहति। नहि भूतभौतिकधर्मेण सता चैतन्येन भूतभौतिकानि विषयीक्रियेरन्। नहि रूपादिभिः स्वरूपं पररूपं वा विषयीक्रियते।

(ब्र० सू० भा० ३।३।५४)

न ह्यविकृत्य संयोगिद्रव्यम् गुणः कश्चिदपयन्नुपयन् वा दृष्टः।

(बृ० उ० भा० १।४।७)

यदि कहो कि भूत और भौतिकों का जो अनुभव है वह चैतन्य है, तो उन भूत और भौतिकों में चैतन्य का विषयत्व होने से चैतन्य उनका धर्म नहीं हो सकता, क्योंकि अपने में (आत्म विषयक) क्रिया का रहना असंगत (विरोधग्रस्त) है। जैसे अग्नि उष्ण होती हुई अपने को नहीं जलाती,...वैसे ही यदि चैतन्य भूत और भौतिक का धर्म है, तो वह भूत भौतिक को अपना विषय नहीं बना सकता। जैसे रूप आदि से (भूत-भौतिक धर्म से) अपना रूप अथवा अन्य का रूप विषय नहीं किया जाता।

संयोगी द्रव्य को विकृत किये बिना कोई गुण कहीं आता जाता नहीं देखा गया। (यदि आत्मा में चैतन्य आदि गुण माने जायँ, जो उत्पन्न व नष्ट होते हैं, तो आत्मा विकारी हो जायगा।)

दृष्टि (ज्ञान) के दो रूप

किं द्वे दृष्टी द्रष्टुर्नित्या अदृश्या, अन्याऽनित्या दृश्येति। बाढम्। प्रसिद्धा तावदनित्या दृष्टिरन्धानन्धत्वदर्शनात्। नित्यैव चेत्सर्वोऽनन्ध एव स्यात् द्रष्टुस्तु नित्या दृष्टिः "न हिं द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतेः। अनुमानाच्च। अन्धस्यापि घटाद्याभासविषया स्वप्ने दृष्टिरुपलभ्यते। सा तर्हीतरदृष्टिनाशे न नश्यति, सा द्रष्टुर्दृष्टिः। तयाऽविपरिलुप्तया नित्यया दृष्ट्या स्वरूपभूतया स्वयंज्योतिः समाख्यया इतरामनित्यां दृष्टिं स्वप्नबुद्धान्तयोः वासनाप्रत्ययरूपां नित्यमेव पश्यन्दृष्टेर्द्रष्टा भवति।

(बृ० उ० भा० १।४।१०)

(प्रश्न) क्या द्रष्टा की दो दृष्टियाँ हैं—एक नित्य और अदृश्य तथा दूसरी अनित्य और दृश्य? (सिद्धान्ती) हां, लोक में अन्धत्व और अनन्धत्व

दोनों देखे जाने से अनित्य दृष्टि तो प्रसिद्ध है। यदि यह दृष्टि नित्य ही होती तो सब अनन्ध (नेत्रवान) ही होते। किन्तु द्रष्टा की दृष्टि का कभी लोप नहीं होता, इस श्रुति के अनुसार द्रष्टा की दृष्टि नित्य है। यह बात अनुमान से भी सिद्ध होती है। अन्धे पुरुष की भी स्वप्न में घटाभासविषयिणी दृष्टि देखी जाती है। वह दृष्टि (नेत्रसम्बन्धिनी) दृष्टि का नाश हो जाने पर भी नष्ट नहीं होती, वह द्रष्टा की दृष्टि है। उस कभी लुप्त न होने वाली स्वयंज्योति संज्ञिका स्वरूपभूता नित्यदृष्टि से स्वप्न और जाग्रत् अवस्था में रहनेवाली वासना प्रत्ययरूपा दृष्टि को नित्य ही देखते रहने के कारण वह दृष्टि का द्रष्टा होता है।

यद्यसदिदं द्वैतं केन समञ्जसमात्मतत्त्वं विबुध्यते इति, उच्यते—अकल्पकं सर्वकल्पनावर्जितं, अत एवाजं ज्ञानं ज्ञप्तिमात्रं ज्ञेयेन परमार्थसता ब्रह्मणाऽभिन्नं प्रचक्षते कथयन्ति ब्रह्मविदः। 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' अग्न्युष्णवत्। 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतिभ्यः। तस्यैव विशेषणं—ब्रह्म ज्ञेयं यस्य, स्वस्थं तदिदं ब्रह्म ज्ञेयं औष्ण्यस्येवाग्निवदभिन्नम्। तेनात्मस्वरूपेणाजेन ज्ञानेन अजं ज्ञेयमात्मतत्त्वं स्वयमेव विबुध्यतेऽवगच्छति। नित्यप्रकाशस्वरूप इव सविता। नित्यविज्ञानैकरसघनत्वान्न ज्ञानान्तरमपेक्षते इत्यर्थः।

(मां० का० भा० ३।३३)

यदि यह सम्पूर्ण द्वैत असत्य है तो प्रकृत सत्य आत्मतत्त्व का ज्ञान किसे होता है? इस पर कहते हैं—

अकल्पक—सम्पूर्ण कल्पनाओं से रहित अतएव अजन्मा अर्थात् ज्ञप्तिमात्र ज्ञान को ब्रह्मवेत्ता लोग ज्ञेय यानी परमार्थ-सत्स्वरूप ब्रह्म से अभिन्न बतलाते हैं। 'अग्नि की उष्णता के समान विज्ञाता के ज्ञान का कभी लोप नहीं होता'। 'ब्रह्म विज्ञान और आनन्द स्वरूप है' इत्यादि श्रुतियों से यही बात प्रमाणित होती है। उस (ज्ञान) के ही विशेषण बतलाते हैं—'ब्रह्मज्ञेयम्' अर्थात् ब्रह्म जिसका ज्ञेय है वह ज्ञान अग्नि की उष्णता के समान ब्रह्म से अभिन्न है। उस आत्मस्वरूप अजन्मा ज्ञान से अजन्मा ज्ञेयरूप आत्मतत्व स्वयं ही जाना जाता है। तात्पर्य यह है कि नित्य प्रकाश स्वरूप सूर्य के समान नित्यविज्ञानैकरसघनरूप होने के कारण यह किसी अन्य ज्ञान की अपेक्षा नहीं करता।

आत्मा और अन्तःकरण

तत्रात्मन उपाधिभूतमन्तःकरणं मनोबुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यते........तच्चैवंभूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यम्।...नित्योपलब्ध्यनुपलब्धिप्रसंगः स्यात्।...यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः।

(ब्र० सू० भा० २।३।३२)

आत्मा की उपाधि अन्तःकरण, मन, बुद्धि, विज्ञान, चित्त इत्यादि अनेक प्रकार जहां तहां कहा गया है... वह इस प्रकार का अन्तःकरण अवश्य है ऐसा स्वीकार करना पड़ता है। क्योंकि उसकी सत्ता न मानने पर उपलब्धि या अनुपलब्धि नित्य हो जायगी। .. जिसके अवधान में उपलब्धि और जिसके अनवधान में अनुपलब्धि होती है वह मन है।

आत्मनः स्वरूपं ज्ञप्तिर्न ततो व्यतिरिच्यते अतो नित्यैव। तथापि बुद्धेरुपाधिलक्षणायाश्चक्षुरादिद्वारैर्विषयाकारेण परिणामिन्या ये शब्दाद्याकारावभासाः ते आत्मविज्ञानस्य विषयभूता उत्पद्यमाना एव आत्मविज्ञानेन व्याप्ता उत्पद्यन्ते। तस्मादात्मविज्ञानावभास्याश्च ते विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभिः परिकल्प्यन्ते।

(तै० उ० भा० २।१)

आत्मा का स्वरूप जो ज्ञप्ति (ज्ञान, संवेदन, चैतन्यमात्र) है उससे वह कभी अलग नहीं होता है, अतः नित्य वस्तु है। तथापि उपाधिरूप से बुद्धि जब नेत्र द्वारा विषय के आकार में परिणमित होकर शब्द आदि की वृत्तिरूप होती है तो ये वृत्तियां आत्मज्ञान के विषय के रूप में उत्पन्न होते ही आत्मज्ञान से व्याप्त होकर पैदा होती हैं। इसलिये आत्मविज्ञान से अवभास्य ये विज्ञानशब्दवाच्य और धात्वर्थभूत विक्रियारूप में आत्मा के ही धर्म हैं—ऐसा अविवेकियों द्वारा समझे जाते हैं।

बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते। सर्वे प्रत्यया विषयीभवन्ति यस्य स आत्मा सर्वबोधान्प्रतिबुध्यते सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्ययेष्वविशिष्टतया लक्ष्यते, नान्यद् द्वारमात्मनो विज्ञानाय। अतः प्रत्ययप्रत्यगात्मतया विदितं ब्रह्म यदा तदा तन्मतं तत्सम्यग्दर्शनमित्यर्थः। (के० उ० भा० २।४)

यहां बोधशब्द से बुद्धि के प्रत्ययों का कथन हुआ है। अतः समस्त प्रतीतियाँ जिसकी विषय होती हैं वह आत्मा समस्त बोधों के समय जाना जाता है। सम्पूर्ण प्रतीतियों का साक्षी और चिच्छक्तिस्वरूपमात्र होने के कारण वह प्रतीतियों द्वारा सामान्य रूप से प्रतीतियों में ही लक्षित होता है। उस अन्तरात्मा का ज्ञान प्राप्त करने के लिए कोई और मार्ग नहीं है। अतः जिस समय ब्रह्म को प्रतीतियों के अन्तः साक्षी रूप से जाना जाता है उसी समय वह ज्ञात होता है, अर्थात् यही उसका सम्यक् ज्ञान है।

प्रत्यक्षप्रक्रिया

बुद्धिस्तावत् स्वच्छत्वादानन्तर्याच्च आत्मचैतन्यज्योतिःप्रतिच्छाया भवति।····ततोऽप्यानन्तर्यान्मनसि चैतन्यावभासता बुद्धिसम्पर्कात्, तत इन्द्रियेषु। मनः संयोगात्। ततोऽनन्तरं शरीरे। इन्द्रियसम्पर्कात्। एवं पारम्पर्येण कृत्स्नं कार्यकारणसंघातमात्मा चैतन्यस्वरूपज्योतिषाऽवभासयति।

(बृ० उ० भा० ४।३।७)

रूपाकारेण हि हृदयं परिणतम्। यस्मात् हृदयेन हि रूपाणि सर्वो लोको जानाति।

(बृ० उ० भा० ३।९।२०)

बुद्धि स्वच्छ है और आत्मा के समीपवर्तिनी है, इसलिए वह आत्मचैतन्य की प्रतिच्छाया से युक्त हो जाती है,···बुद्धि के सम्पर्क से मन में चैतन्यावभासता आती है और मन का (इन्द्रियों से) सम्पर्क होने के कारण उनसे शरीर में चैतन्यावभासता आती है, इस प्रकार परम्परा से आत्मा सम्पूर्ण कार्यकारण-संघात को चैतन्यस्वरूप प्रकाश से प्रकाशित कर देता है।

हृदय (अन्तःकरण) ही रूप का आकार धारण कर लेता है, अतः हृदय से ही सब लोग रूपों को जानते हैं।

न ह्यन्तःकरणमन्तरेण चैतन्यज्योतिषा दीपितं स्वविषयसंकल्पाध्यवसायादिसमर्थं स्यात्।

(के० उ० भा० १।२)

संघातो देहेन्द्रियाणां संहतिः। तस्यामभिव्यक्ता अन्तःकरणवृत्तिः, तप्त इव लोहपिण्डेऽग्निः आत्मचैतन्याभासरसविद्धा चेतना, सा च क्षेत्रं ज्ञेयत्वात्।

(गी० भा० १३।६)

मनउपाधिकत्वाद्धि मनसः संकल्पस्मृत्यादिप्रत्ययैरभिव्यज्यते ब्रह्म, विषयीक्रियमाणमिव ।

(के० उ० भा० ४।५)

बुद्धिविज्ञानालोकविशिष्टमेवहि सर्वं विषयजातमुपलभ्यते ।

(बृ० उ० भा० ४।३।७)

बुद्धिविज्ञानोपाधिसम्पर्काविवेकात् विज्ञानमय इत्युच्यते, बुद्धिविज्ञानसम्पृक्त एव हि यस्मादुपलभ्यते, राहुरिव चन्द्रादित्यसम्पृक्तः ।

(बृ० उ० भा० ४।३।७)

अन्तःकरण, चैतन्य के प्रकाश से प्रकाशित हुए विना, अपने विषय के संकल्प —अध्यवसाय आदि में समर्थ नहीं हो सकता ।

देह तथा इन्द्रियों के समूह को संघात कहते हैं । उसमें अभिव्यक्त अन्तःकरणवृत्ति, तपे हुए लोहपिण्ड में अग्नि के तुल्य, आत्मा के चैतन्य के आभासरस से व्याप्त होकर चेतना कही जाती है और चेतना भी ज्ञेय होने के कारण क्षेत्र ही है ।

मन उपाधि है जिससे मन के संकल्प, स्मृति आदि प्रत्ययों से ब्रह्म अभिव्यक्त होता है, मानों विषय वन रहा है ।

सारे पदार्थ वुद्धिरूप विज्ञान के आलोक से विशिष्ट होकर ही उपलब्ध होते हैं ।

बुद्धिविज्ञानरूप उपाधि के सम्पर्क का विवेक न होने के कारण यह विज्ञानमय कहा जाता है, क्योंकि जिसप्रकार राहु चन्द्रमा और सूर्य के सम्पर्क में आकर ही उपलब्ध होता है, उसी प्रकार बुद्धिरूप विज्ञान से सम्पर्क रखकर ही अनुभव में आता है ।

साक्षिज्ञान और वृत्तिज्ञान

न हि यस्य यत्स्वरूपं तत्तेनान्यतोऽपेक्ष्यते । न च स्वत एवापेक्षा,··· यद्धयनपेक्षं तत्स्वत एव सिद्धं, प्रकाशात्मकत्वात् । प्रदीपस्यान्योऽपेक्षितोऽप्यनर्थकः स्यात् प्रकाशे विशेषाभावात् । नहि प्रदीपस्य स्वरूपाभिव्यक्तौ प्रदीपप्रकाशोऽर्थवान् । न चैवमात्मनोऽन्यत्र विज्ञानमस्ति येन स्वरूपविज्ञानेऽप्यपेक्ष्येत । (विरोध इति चेन्नान्यत्वात्) । स्वरुपविज्ञाने विज्ञानस्वरूपत्वाद्विज्ञानान्तरं नापेक्षत इत्येतदसत् । दृश्यते हि

विपरीतज्ञानमात्मनि सम्यग्ज्ञानं च,·· अन्यो हि स आत्मा बुद्ध्यादिकार्यकरणसंघाताभिमानसंतानाविच्छेदलक्षणोऽविवेकात्मको बुद्ध्यवभासप्रधानश्चक्षुरादिकरणो नित्यचित्स्वरूपात्मान्तःसारो यत्रानित्यं विज्ञानमवभासते।···स बाह्यो बुद्ध्यात्मा···अतोऽन्यो नित्यविज्ञानस्वरूपादात्मनः। तत्र हि विज्ञानापेक्षा विपरीतज्ञानत्वं चोपपद्यते, न पुनर्नित्यविज्ञाने।

(के० उ० वा० भा० १।४)

जिसका जो स्वरूप होता है वह उसी की दूसरे से अपेक्षा नहीं रखता और अपने से तो अपेक्षा हुआ ही नहीं करती······इस प्रकार जो अपेक्षा नहीं रखता वह स्वतःसिद्ध है। दीपक प्रकाशस्वरूप ही है, अतः अपने स्वरूप की अभिव्यक्ति के लिये यदि वह प्रकाशान्तर की अपेक्षा करे तो व्यर्थ ही होगा, क्योंकि प्रकाश में कोई विशेपता नहीं हुआ करती। एक दीपक के स्वरूप की अभिव्यक्ति में किसी अन्य दीपक का प्रकाश सार्थक नहीं होता। इसी प्रकार आत्मा से भिन्न ऐसा कोई विज्ञान नहीं जो उसके स्वरूप का ज्ञान कराने के लिए अपेक्षित हो।······बुद्धि आदि कार्य और कारण के संघात में जो अभिमान है उसकी परम्परा का विच्छेद न होना ही जिसका लक्षण है, नित्य चित्स्वरूप आत्मा ही जिसका आन्तरिक सार है और जिसमें अनित्य विज्ञान का अवभास हुआ करता है वह अविवेकात्मक, चिदाभास प्रधान तथा चक्षु आदि करणों वाला आत्मा भिन्न है।······वह बुद्ध्यात्मा (जीवात्मा) दाह्य है·· इसलिए नित्य विज्ञान, स्वरूप आत्मा से भिन्न है तथा उसको विपरीत ज्ञान होता है और विज्ञान की उपेक्षा भी। नित्य विज्ञानस्वरूप (शुद्ध चेतन) में नहीं।

तस्मान्नित्यालुप्तविज्ञानस्वरूपज्योतिरात्मा ब्रह्मेत्ययमर्थः सर्वबोधबोद्धृत्वं आत्मनः सिद्ध्यति नान्यथा। तस्मात् प्रतिबोधविदितं मतमिति यथाव्याख्यात एवार्थोऽस्माभिः। यत्पुनः स्वसंवेद्यता प्रतिबोधविदितमित्यस्य वाक्यार्थो वर्ण्यते, तत्र भवति सोपाधिकत्व आत्मनो बुद्ध्युपाधिस्वरूपत्वेन भेदं परिकल्प्यात्मनात्मानं वेत्तीति संव्यवहारः 'आत्मानं पश्यति' 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति। न तु निरुपाधिकस्यात्मन एकत्वे स्वसंवेद्यता परसंवेद्यता वा सम्भवति। संवेदनस्वरूपत्वात्संवेदनान्तरापेक्षा च न सम्भवति यथा प्रकाशस्य प्रकाशान्तरापेक्षाया न सम्भवस्तद्वत्।

(के० उ० भा० २।४)

बुद्धेः परतस्तु स बुद्धेर्द्रष्टा पर आत्मा।

(गी० भा० ४।४२)

अतः नित्य अविनाशी ज्ञानस्वरूप प्रकाशमय आत्मा ही ब्रह्म है। यह अर्थ आत्मा के सम्पूर्ण बोधों के बोद्धा होने पर ही सिद्ध हो सकता है, और किसी प्रकार नहीं। इसलिए प्रतिबोधविदितम्—इसकी—हमने जैसी व्याख्या की—वही अर्थ है। इसके सिवा प्रतिबोधविदितम् इस वाक्य का जो स्वसंवेद्यता अर्थ वर्णित किया जाता है वह आत्मा को सोपाधिक मानकर उसमें बुद्धि आदि उपाधि रूप से भेद की कल्पना कर 'आत्मा से आत्मा को जानता है' ऐसा व्यवहार होता है। जैसा कि 'आत्मा में ही आत्मा को देखता है' 'हे पुरुषोत्तम! तुम स्वयं अपने को अपने ही से जानते हो' इत्यादि वाक्यों द्वारा कहा गया है। किन्तु निरुपाधिक आत्मा एकरूप होने से उसमें स्वसंवेद्यता या परसंवेद्यता सम्भव ही नहीं है। जिस प्रकार प्रकाश को किसी अन्य प्रकाश की अपेक्षा होना संभव नहीं है उसी प्रकार ज्ञानस्वरूप होने के कारण उसे अन्य ज्ञान की अपेक्षा नहीं है।

बुद्धि से परे जो है वह पर आत्मा बुद्धि का द्रष्टा है।

ननु येनैव धर्मेण यद्रूप्यते तदेव तस्य स्वरूपमिति ब्रह्मणोऽपि येन विशेषणनिरूपणं तदेव तस्य रूपं स्यादत उच्यते—चैतन्यं पृथिव्यादीनामन्यतमस्य सर्वेषां विपरिणतानां वा धर्मो न भवति तथा श्रोत्रादीनामन्तःकरणस्य च धर्मो न भवतीति ब्रह्मणो रूपमिति ब्रह्म रूप्यते चैतन्येन। तथा चोक्तम्—'विज्ञानमानन्दं ब्रह्म', 'विज्ञानघनएव', 'सत्यं ज्ञानमनन्तं ब्रह्म', 'प्रज्ञानं ब्रह्म', इति च ब्रह्मणो रूपं निर्दिष्टं श्रुतिषु। सत्यमेवं तथापि तदन्तःकरणदेहेन्द्रियोपाधिद्वारेणैव विज्ञानादिशब्दैर्निर्दिश्यते तदनुकारित्वाद्देहादिवृद्धिसंकोचोच्छेदादिषु नाशेषु खमिव न स्वतः।

(के० उ० भा० २।१)

पूर्वपक्ष—जिस धर्म के द्वारा जिसका निरूपण किया जाता है वही उसका रूप हुआ करता है; अतः ब्रह्म का भी जिस विशेषण से निरूपण होता है वही उसका स्वरूप होना चाहिए। अतः यह कहते हैं कि चैतन्य पृथिवी आदि का अथवा परिणाम को प्राप्त हुये अन्य समस्त पदार्थों में से किसी का धर्म नहीं है और न वह श्रोत्रादि इन्द्रिय अथवा अन्तःकरण का ही धर्म है। अतएव वह ब्रह्म का रूप है, इसीलिये ब्रह्म का चैतन्यरूप से निरूपण किया जाता है। ऐसा कहा

